# अपरोक्षानुभूतिः

aparokṣānubhūtiḥ

श्रीहरिं परमानन्दमुपदेष्टारमीश्वरम् ।

व्यापकं सर्वलोकानां कारणं तं नमाम्यहम् ॥ १ ॥

śrīhariṁ paramānandamupadeṣṭāramīśvaram |
vyāpakaṁ sarvalokānāṁ kāraṇaṁ taṁ namāmyaham || 1 ||

अपरोक्षानुभूतिर्वै प्रोच्यते मोक्षसिद्धये ।

सद्भिरेव प्रयत्नेन वीक्षणीया मुहुर्मुहुः ॥ २ ॥

aparokṣānubhūtirvai procyate mokṣasiddhaye |
sadbhireva prayatnena vīkṣaṇīyā muhurmuhuḥ || 2 ||

स्ववर्णाश्रमधर्मेण तपसा हरितोषणात् ।

साधनं च भवेत्पुंसां वैराग्यादिचतुष्टयम् ॥ ३ ॥

svavarṇāśramadharmeṇa tapasā haritoṣaṇāt |
sādhanaṁ ca bhavetpuṁsāṁ vairāgyādicatuṣṭayam || 3 ||

ब्रह्मादिस्थावरान्तेषु वैराग्यं विषयेष्वनु ।

यथैव काकविष्ठायां वैराग्यं तद्धि निर्मलम् ॥ ४ ॥

brahmādisthāvarānteṣu vairāgyaṁ viṣayeṣvanu |
yathaiva kākaviṣṭhāyāṁ vairāgyaṁ taddhi nirmalam || 4 ||

नित्यमात्मस्वरूपं हि दृश्यं तद्विपरीतगम्।

एवं यो निश्चयः सम्यग्विवेको वस्तुनः स वै ॥ ५॥

nityamātmasvarūpaṁ hi dṛśyaṁ tadviparītagam |
evaṁ yo niścayaḥ samyagviveko vastunaḥ sa vai || 5 ||

सदैव वासनात्यागः शमोऽयमिति शब्दितः।

निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते ॥ ६ ॥

sadaiva vāsanātyāgaḥ śamo'yamiti śabditaḥ |
nigraho bāhyavṛttīnāṁ dama ityabhidhīyate || 6 ||

विषयेभ्यः परावृत्तिः परमोपरतिर्हि सा।

सहनं सर्वदुःखानां तितिक्षा सा शुभा मता ॥ ७ ॥

viṣayebhyaḥ parāvṛttiḥ paramoparatirhi sā |
sahanaṁ sarvaduḥkhānāṁ titikṣā sā śubhā matā || 7 ||

निगमाचार्यवाक्येषु भक्तिः श्रद्धेति विश्रुता।

चित्तैकाग्र्यं तु सल्लक्ष्ये समाधानमिति स्मृतम्॥ ८ ॥

nigamācāryavākyeṣu bhaktiḥ śraddheti viśrutā |
cittaikāgryaṁ tu sallakṣye samādhānamiti smṛtam || 8 ||

संसारबन्धनिर्मुक्तिः कथं मे स्यात् कदा विधे ।

इति या सुदृढा बुद्धिर्वक्तव्या सा मुमुक्षुता ॥ ९ ॥

saṁsārabandhanirmuktiḥ kathaṁ me syāt kadā vidhe |
iti yā sudṛḍhā buddhirvaktavyā sā mumukṣutā || 9 ||

उक्तसाधनयुक्तेन विचारः पुरुषेण हि ।

कर्तव्यो ज्ञानसिद्ध्यर्थमात्मनः शुभमिच्छता ॥ १० ॥

uktasādhanayuktena vicāraḥ puruṣeṇa hi |
kartavyo jñānasiddhyarthamātmanaḥ śubhamicchatā || 10 ||

इदं साधनचतुष्टयं यदर्थमुपन्यस्तं तदिदानीं दर्शयति--**उक्तेति** । उक्तानि--ब्रह्मादीत्यारभ्य वक्तव्या सा मुमुक्षुतेत्यन्तग्रन्थसन्दर्भेण वर्णितानि यानि वैराग्यादिसाधनानि ज्ञानोपकरणानि तैर्युक्तेन पुरुषेणाधिकारिणा देहवता मनुष्योत्तमेन हीति विद्वत्प्रसिद्धत्वेन वक्ष्यमाणलक्ष्णः ।यद्वा हीत्यव्ययमेवार्थेऽन्यनिषेधार्थ इत्यर्थः । विचारो विवेकः कर्तव्य आवर्त्तयितव्यः । किमर्थमित्यत आह--**ज्ञानसिद्ध्यर्थमिति** । आत्मनो ज्ञानसिद्ध्यर्थं ब्रह्मात्मैक्यबोधोद्भवनाय । नन्वात्मज्ञानसिद्ध्या कः पुरुषर्थ इत्याशङ्क्य मोक्षाख्यं चतुर्थपुरुषार्थरूपं फलं द्योतयन् पुरुषार्थं विशिनष्टि--**शुभमिति** । शुभं परमानन्दरूपत्वेन मङ्गलं मोक्षसुखमित्यर्थः । इच्छता प्रार्थयता । आत्मनः शुभमिति वान्वयः ॥ १० ॥

idaṁ sādhanacatuṣṭayaṁ yadarthamupanyastaṁ tadidānīṁ darśayati--**ukteti** | uktāni brahmādītyārabhya vaktvyā sā mumukṣutetyantagranthasandarbheṇa varṇitāni yāni vairāgyādisādhanāni jñānopakaraṇāni tairyuktena puruṣeṇādhikāriṇā dehavatā manuṣyottamena hīti vidvatprasiddhatvena vakṣyamāṇalakṣṇaḥ |yadvā hītyavyayamevārthe'nyaniṣedhārtha ityarthaḥ | vicāro vivekaḥ kartavya

āvarttayitavyaḥ | kimarthamityata āha--**jñānasiddhyarthamiti** | ātmano jñānasiddhyarthaṁ brahmātmaikyabodhodbhavanāya | nanvātmajñānasiddhyā kaḥ puruṣartha ityāśaṅkya mokṣākhyaṁ caturthapuruṣārtharūpaṁ phalaṁ dyotayan puruṣārthaṁ viśinaṣṭi--**śubhamiti** | śubhaṁ paramānandarūpatvena maṅgalaṁ mokṣasukhamityarthaḥ | icchatā prārthayatā | ātmanaḥ śubhamiti vānvayaḥ || 10 ||

नोत्पद्यते विना ज्ञानं विचारेणान्यसाधनैः ।
यथा पदार्थभानं हि प्रकाशेन विना क्वचित् ॥ ११ ॥

notpadyate vinā jñānaṁ vicāreṇānyasādhanaiḥ |
yathā padārthabhānaṁ hi prakāśena vinā kvacit || 11 ||

ननु ज्ञानसिद्ध्यर्थं विचार एव कर्तव्य इति नियमः कुतः क्रियत इत्याशङ्क्य सदृष्टान्तमाह--**नोत्पद्यत इति**। विचारेण विना अन्यसाधनैः कर्मोपासनालक्षणैः ज्ञानं नोत्पद्यते। तत्र दृष्टान्तमाह--**यथेति**। यथा क्वचित्कंश्चिद्देशे सूर्यादिप्रकाशेन विना पदार्थभानं घटादिवस्तुप्रकाशो न भवति। हीति सर्वजनप्रसिद्धम्। अतो नियमः क्रियत इति भावः ॥ ११ ॥

nanu jñānasiddhyarthaṁ vicāra eva kartavya iti niyamaḥ kutaḥ kriyata ityāśaṅkya sadṛṣṭāntamāha--**notpadyata iti** | vicāreṇa vinā anyasādhanaiḥ karmopāsanālakṣaṇaiḥ jñānaṁ notpadyate | tatra dṛṣṭāntamāha-- **yatheti** | yathā kvacitkaṁściddeśe sūryādiprakāśena vinā padārthabhānaṁ ghaṭādivastuprakāśo na bhavati | hīti sarvajanaprasiddham | ato niyamaḥ kriyata iti bhāvaḥ || 11 ||

कोऽहं कथमिदं जातं को वै कर्ताऽस्य विद्यते ।
उपादानं किमस्तीह विचारः सोऽयमीदृशः ॥ १२ ॥

ko'haṁ kathamidaṁ jātaṁ ko vai kartā'sya vidyate |
upādānaṁ kimastīha vicāraḥ so'yamīdṛśaḥ || 12 ||

तर्हि स विचारः कीदृश इत्यत आह--**कोऽहमिति**। अहं कर्ता सुखीत्यादिव्यवह्रियमानः कः किंस्वरूपः तथा इदं जगत् स्तावरजङ्गमात्मकं कथं कस्माज्जातम्। किमधिष्ठानमित्यर्थः। तथाऽस्य प्रत्यक्षादिप्रमाणसिद्धस्य जगतः कर्त्तोत्पादकः को विद्यते। वै इति विकल्पं द्योतयति। किं जीवदृष्टं कर्तृ किं वेश्वरः किं वान्यदेव किंचिदिति विकल्पः। किं चेह जगति उपादानं घटस्य मृद्वत् किमस्ति। अयमात्मा जगत्कारणविषयः ईदृश एवंस्वरूपो विचारः। स एव ज्ञानसाधनमित्यर्थः॥ १२॥

tarhi sa vicāraḥ kīdṛśa ityata āha--**ko'hamiti** | ahaṁ kartā sukhītyādivyavahriyamānaḥ kaḥ kiṁsvarūpaḥ tathā idaṁ jagat stāvarajaṅgamātmakaṁ kathaṁ kasmājjātam | kimadhiṣṭhānamityarthaḥ | tathā'sya pratyakṣādipramāṇasiddhasya jagataḥ karttotpādakaḥ ko vidyate | vai iti vikalpaṁ dyotayati | kiṁ jīvadṛṣṭaṁ kartṛ kiṁ veśvaraḥ kiṁ vānyadeva kiñciditi vikalpaḥ | kiṁ ceha jagati upādānaṁ ghaṭasya mṛdvat kimasti | ayamātmā jagatkāraṇaviṣayaḥ īdṛśa evaṁsvarūpo vicāraḥ | sa eva jñānasādhanamityarthaḥ || 12 ||

नाहं भूतगणो देहो नाहं चाक्षगणस्तथा।
एतद्विलक्षणः कश्चिद्विचारः सोऽयमीदृशः॥ १३॥

nāhaṁ bhūtagaṇo deho nāhaṁ cākṣagaṇastathā |
etadvilakṣaṇaḥ kaścidvicāraḥ so'yamīdṛśaḥ || 13 ||

ननु चैतन्यविशिष्टः कायः पुरुष इति बार्हस्पत्यसूत्राद्देहाकारेण परिणतानि पृथिव्यादिचत्वारि भूतान्येवात्मेति **चार्वाकाः** वदन्ति। स एव कर्ता सुखीत्यादिसर्वव्यवहारमूलमिति सर्वजनप्रसिद्धौ सत्यामात्मविषयो विचारो न स्यादित्यत आह **नाहमिति**। अहमहंशब्दप्रत्ययालम्बनः प्रत्यगात्मा भूतगणो यो देहः स न भवामि तस्य घटादिवद् दृश्यत्वादित्यर्थः। तर्हीन्द्रियगणस्त्वं स्या इति चार्वाकैकदेशिमतमुत्थाप्य दूषयति --**नाहं चेति**। च पुनरक्षगणः श्रोत्रादीनिद्रियसङ्घातोऽप्यहं न भवामि। तथेतिपदेन देहवदिन्द्रियगणस्यापि भूतविकारत्वं दर्शितम्। स वा एष पुरुषोऽन्नरसमयः अन्नमयं हि

सोम्य मन आपोमयः प्राणस्तजोमयी वाक् इत्यादिश्रुतिरुभयत्र प्रमाणम्। ननु यदि देहद्वयं त्वं नास्ति तर्हि शून्यमेव स्यादित्याशङ्क्याह **एतदिति**। एतद्विलक्षणः एताभ्यां स्थूलसूक्ष्मदेहाभ्यां विपरीतधर्मकोऽस्मि। अस्थूलमनण्वह्रस्वम् इत्यादिश्रुतेः। **कश्चिदिति**। जात्यादिरहितत्वान्मनोवाचामगोचरत्वं दर्शितम्। अयमीदृशः स विचार इति व्याख्यातार्थश्चतुर्थः पादः श्लोकचतुष्टयेऽपि बोद्धव्यः॥ १३॥

nanu 'caitanyaviśiṣṭaḥ kāyaḥ puruṣa' iti bārhaspatyasūtrāddehākāreṇa pariṇatāni pṛthivyādicatvāri bhūtānyevātmeti **cārvākāḥ** vadanti | sa eva kartā sukhītyādisarvavyavahāramūlamiti sarvajanaprasiddhau satyāmātmaviṣayo vicāro na syādityata āha -- **nāhamiti** | ahamahaṁśabdapratyayālambanaḥ pratyagātmā bhūtagaṇo yo dehaḥ sa na bhavāmi, tasya ghaṭādivad dṛśyatvādityarthaḥ | 'tarhīndriyagaṇastvaṁ syā' iti cārvākaikadeśimatamutthāpya dūṣayati-- **nāhaṁ ceti** | ca punarakṣagaṇaḥ = śrotrādīnidriyasaṅghāto'pyahaṁ na bhavāmi | tathetipadena dehavadindriyagaṇasyāpi bhūtavikāratvaṁ darśitam | 'sa vā eṣa puruṣo'nnarasamayaḥ annamayaṁ hi somya mana āpomayaḥ prāṇastajomayī vāk' ityādiśrutirubhayatra pramāṇam | nanu yadi dehadvayaṁ tvaṁ nāsti tarhi śūnyameva syādityāśaṅkyāha -- **etaditi** | etadvilakṣaṇaḥ etābhyāṁ sthūlasūkṣmadehābhyāṁ viparītadharmako'smi | 'asthūlamananṇvahrasvam' ityādiśruteḥ | **kaściditi** | jātyādirahitatvānmanovācāmagocaratvaṁ darśitam | ayamīdṛśaḥ sa vicāra iti vyākhyātārthaścaturthaḥ pādaḥ ślokacatuṣṭaye'pi boddhavyaḥ || 13 ||

अज्ञानप्रभवं सर्वं ज्ञानेन प्रविलीयते।
सङ्कल्पो विविधः कर्ता विचारः सोऽयमीदृशः॥ १४॥

ajñānaprabhavaṁ sarvaṁ jñānena pravilīyate |
saṅkalpo vividhaḥ kartā vicāraḥ so'yamīdṛśaḥ || 14 ||

तदेवं कोऽहमित्येतन्निश्चित्येदानीं कथमिदं जातमित्यस्य निश्चयः क्रियते। तत्र 'पृथिव्यादिभूतानि कार्यत्वात्स्वस्वपरमानुभ्यो जायन्ते' इति **तार्किकादयो** मन्यन्ते। 'कर्मणो

जायन्ते' इति **मीमांसकाः**। 'प्रधानादेव' इति **साङ्ख्याः**। तदेतन्निराकुर्वन्नाह-- **अज्ञानेति**। सर्वं जगदिदं नामरूपात्मकम् अज्ञानप्रभवम् अज्ञानात् पूर्वोक्तस्वस्वरूपास्फुरणात् प्रभवति। तथाविधम्, अत एवैतद्विरोधिना ज्ञानेन स्वस्वरूपस्फुरणेन तम इव प्रकाशेन प्रविलीयते, निश्शेषलीनं भवतीत्यर्थः। को वै कर्तेत्यस्य निर्णयमाह -- **सङ्कल्प इति**। विविधो नानाप्रकारः सङ्कल्पः इदं करिष्यामीत्यादिलक्षणोऽन्तःकरणपरिणामः। कारणानुकूलव्यापारवान् कर्ता। शेषं पूर्वोक्तम्॥ १४॥

tadevaṁ ko'hamityetanniścityedānīṁ kathamidaṁ jātamityasya niścayaḥ kriyate | tatra pṛthivyādibhūtāni kāryatvātsvasvaparamānubhyo jāyante iti **tārkikādayo** manyante | 'karmaṇo jāyante' iti **mīmāṁsakāḥ** | 'pradhānādeva' iti **sāṅkhayāḥ** | tadetannirākurvannāha -- **ajñāneti** | sarvaṁ jagadidaṁ nāmarūpātmakam ajñānaprabhavam ajñānāt pūrvoktasvasvarūpāsphuraṇāt prabhavati | tathāvidham, ata evaitadvirodhinā jñānena svasvarūpasphuraṇena tama iva prakāśena pravilīyate, niśśeṣalīnaṁ bhavatītyarthaḥ | ko vai kartetyasya nirṇayamāha -- **saṅkalpa iti** | vividho nānāprakāraḥ saṅkalpaḥ idaṁ kariṣyāmītyādilakṣaṇo'ntaḥkaraṇapariṇāmaḥ | kāraṇānukūlavyāpāravān kartā | śeṣaṁ pūrvoktam || 14 ||

एतयोर्यदुपादानमेकं सूक्ष्मं सदव्ययम्।
यथैव मृद्घटादीनां विचारः सोऽयमीदृशः॥ १५॥

etayoryadupādānamekaṁ sūkṣmaṁ sadavyayam |
yathaiva mṛdghaṭādīnāṁ vicāraḥ so'yamīdṛśaḥ || 15 ||

अथोपादानां किमस्तीत्यस्य निर्णयमाह एतयोरिति। एतयोरज्ञानसङ्कल्पयोर्यदुपादानं उत्पत्तिस्थितिनाशाय करणं तत्तु सत्कालत्रयाबाध्यं ब्रह्मैव नान्यदित्यर्थः। अत एवाधिष्ठानज्ञाननिर्वृत्त्याऽज्ञानकार्यत्वेन मिथ्याभूतमपि जगत् यावज्ज्ञानोदयं रज्जुसर्पादिवत् संसारभयव्यवहारक्षमं भवेदिति भावः। ब्रह्मणः सत्त्वे हेतुः अव्ययमिति। अव्ययमपक्षयरहितम्। अनेनैतत्पूर्वभुता अपि जन्मादिविकारा निरस्ताः नाशश्च निरस्तः। षड्भावविकारराहित्ये हेतुः एकं सगातीयादिभेदशून्यम्। तद्धि कुतो न दृश्यते तत्राह

सूक्ष्ममिति। सूक्ष्मं मनोवागादीन्द्रयागोचरम्। तेषां प्रवृत्तिनिमित्तजातिक्रियादिशून्यत्वाद् इत्यर्थः। ब्रह्मण उपादानत्वे दृष्टान्तमाह यथैवेति। यथैव मृद्धटादीनामुपादानं तथैवेत्यर्थः। एवंप्रकारेण कार्यकारणभेदो नाममात्रमिति सूचितम्॥ १५॥

athopādānāṁ kimastītyasya nirṇayamāha etayoriti | etayorajñānasaṅkalpayoryadupādānam utpattisthitināśāya karraṇaṁ tattu satkalatrayābādhyaṁ brahmaiva nānyadityarthaḥ | ata evādhiṣṭhānajñānanirvṛttyā'jñānakāryatvena mithyābhūtamapi jagat yāvajjñānoodayaṁ rajjusarpādivat saṁsārabhayavyavahārakṣamaṁ bhavediti bhāvaḥ | brahmaṇaḥ sattve hetuḥ avyayamiti | avyayamapakṣayarahitam | anenaitatpūrvabhutā api janmādivikārā nirastāḥ nāśaśca nirastaḥ | ṣaḍbhāvavikārarāhitye hetuḥ ekaṁ sagātīyādibhedaśūnyam | taddhi kuto na dṛśyate tatrāha sūkṣmamiti | sūkṣmaṁ manovāgādīndrayāgocaram | teṣāṁ pravṛttinimittajātikriyādiśūnyatvād ityarthaḥ | brahmaṇa upādānatve dṛṣṭāntamāha yathaiveti | yathaiva mṛddhaṭādīnāmupādānaṁ tathaivetyarthaḥ | evamprakāreṇa kāryakāraṇabhedo nāmamātramiti sūcitam || 15 ||

अहमेकोऽपि सूक्ष्मश्च ज्ञाता साक्षी सदवययः।
तदहं नात्र सन्देहो विचारः सोऽयमीदृशः॥ १६॥

ahameko'pi sūkṣmaśca jñātā sākṣī sadavayayaḥ |
tadahaṁ nātra sandeho vicāraḥ so'yamīdṛśaḥ || 16 ||

ननु यद्यपि कार्यकारणभेदो वाचारम्भणमात्रस्तथापि जीवब्रह्मणोर्भेदो वास्तवः स्यादित्याशङ्क्याह अहमिति। अत्र यत इत्यध्याहारः। तथाचायमर्थः यतोऽहमहंप्रत्ययवेद्योऽप्येकः सजातीयादिभेदशून्यः। मनुष्यमात्रेऽप्यहंबुद्धेरेकत्वप्रतीतेरित्यर्थः। च पुनः सूक्ष्म इन्द्रियागोचरः। पुनर्ज्ञाताऽहङ्कारादिप्रकाशकत्वेन चेतन इत्यर्थः। तथा साक्षी साक्षादिन्द्रियार्थसन्निकर्षं विनैवेक्षते पश्यति प्रकाशयतीति साक्षी निर्विकार इत्यर्थः। अत एव सदव्ययः संश्चासावव्ययश्च विनाशापक्षयोपलक्षितसर्वविकारशून्य इत्यर्थः। यस्मादेवम्भूतोऽहं तत्तस्माद्

अहमहंप्रत्ययवेद्यः तत्सत्यज्ञानादिलक्षणं ब्रह्म अत्र सन्देहो नास्तीत्यर्थः। सोऽयमीदृशो विचार इति ॥ १६ ॥

nanu yadyapi kāryakāraṇabhedo vācārambhaṇamātrastathāpi jīvabrahmaṇorbhedo vāstavaḥ syādityāśaṅkyāha ahamiti | atra yata ityadhyāhāraḥ | tathācāyamarthaḥ yato'hamahampratyayavedyo'pyekaḥ sajātīyādibhedaśūnyaḥ | manuṣyamātre'pyahambuddherekatvapratīterityarthaḥ | ca punaḥ sūkṣma indriyāgocaraḥ | punarjñātā'haṅkārādiprakāśakatvena cetana ityarthaḥ | tathā sākṣī sākṣādindriyārthasannikarṣaṁ vinaivekṣate paśyati prakāśayatīti sākṣī nirvikāra ityarthaḥ | ata eva sadavyayaḥ saṁścāsāvavyayaśca vināśāpakṣayopalakṣitasarvavikāraśūnya ityarthaḥ | yasmādevambhūto'haṁ tattasmād ahamahampratyayavedyaḥ tatsatyajñānādilakṣaṇaṁ brahma atra sandeho nāstītyarthaḥ | so'yamīdṛśo vicāra iti || 16 ||

आत्मा विनिष्कलो ह्येको देहो बहुभिरावृतः।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम्॥ १७ ॥

ātmā viniṣkalo hyeko deho bahubhirāvṛtaḥ |
tayoraikyaṁ prapaśyanti kimajñānamataḥ param || 17 ||

आत्मा नियामकश्चान्तर्देहो बाह्यो नियम्यकः।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम्॥ १८ ॥

ātmā niyāmakaścāntardeho bāhyo niyamyakaḥ |
tayoraikyaṁ prapaśyanti kimajñānamataḥ param || 18 ||

आत्मा ज्ञानमयः पुण्यो देहो मांसमयोऽसुचिः।
तयोरैक्यं प्रपश्यन्ति किमज्ञानमतः परम्॥ १९ ॥

ātmā jñānamayaḥ puṇyo deho māṁsamayo'suciḥ |
tayoraikyaṁ prapaśyanti kimajñāanamataḥ param || 19 ||

आत्मा प्रकाशकः स्वच्छो देहस्तामस उच्यते ।

तयोरैक्यं प्रपश्यन्ति किमज्ञानतः परम् ॥ २० ॥

ātmā prakāśakaḥ svaccho dehastāmasa ucyate |
tayoraikyaṁ prapaśyanti kimajñānataḥ param || 20 ||

आत्मा नित्यो हि सद्रूपो देहोऽनित्यो ह्यसन्मयः ।

तयोरैक्यं प्र्पस्यन्ति किमज्ञानमतः परम् ॥ २१ ॥

ātmā nityo hi sadrūpo deho'nityo hyasanmayaḥ |
tayoraikyaṁ prpasyanti kimajñānamataḥ param || 21 ||

आत्मनस्तत्प्रकाशत्वं यत्पदार्थावभासनम् ।

नाग्न्यादिदीप्तिवद्दीप्तिर्भवत्यान्ध्यं यतो निशि ॥ २२ ॥

ātmanastatprakāśatvaṁ yatpadārthāvabhāsanam |
nāgnyādidīptivaddīptirbhavatyāndhyaṁ yato niśi || 22 ||

देहोऽहमित्ययं मूढो धृत्वा तिष्ठत्यहो जनः ।

ममायमित्यपि ज्ञात्वा घटद्रष्टेव सर्वदा ॥ २३ ॥

deho'hamityayaṁ mūḍho dhṛtvā tiṣṭhatyaho janaḥ |
mamāyamityapi jñātvā ghaṭadraṣteva sarvadā || 23 ||

ब्रह्मैवाहं समः शान्तः सच्चिदानन्दलक्षणः ।

नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २४ ॥

brahmaivāhaṁ samaḥ śāntaḥ saccidānandalakṣaṇaḥ |
nāhaṁ deho hyasadrūpo jñānamityucyate budhaiḥ || 24 ||

निर्विकारो निराकारो निरवद्योऽहमव्ययः ।

नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २५ ॥

nirvikāro nirākāro niravadyo'hamavyayaḥ |
nāhaṁ deho hyasadrūpo jñānamityucyate budhaiḥ || 25 ||

निरामयो निराभासो निर्विकल्पोऽहमाततः ।

नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २६ ॥

nirāmayo nirābhāso nirvikalpo'hamātataḥ |
nāhaṁ deho hyasadrūpo jñānamityucyate budhaiḥ || 26 ||

निर्गुणो निष्क्रियो नित्यो नित्यमुक्तोऽहमच्युतः ।

नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २७ ॥

nirguṇo niṣkriyo nityo nityamukto'hamacyutaḥ |
nāhaṁ deho hyasadrūpo jñānamityucyate budhaiḥ || 27 ||

निर्मलो निश्चलोऽनन्तः शुद्धोऽहमजरोऽमरः ।

नाहं देहो ह्यसद्रूपो ज्ञानमित्युच्यते बुधैः ॥ २८ ॥

nirmalo niścalo'nantaḥ śuddho'hamajaro'maraḥ |
nāhaṁ deho hyasadrūpo jñānamityucyate budhaiḥ || 28 ||

स्वदेहे शोभनं सन्तं पुरुषाख्यं च सम्मतम् ।

किं मूर्ख शून्यमात्मानं देहातीतं करोषि भोः ॥ २९ ॥

svadehe śobhanaṁ santaṁ puruṣākhyaṁ ca sammatam |
kiṁ mūrkha śūnyamātmānaṁ dehātītaṁ karoṣi bhoḥ || 29 ||

स्वात्मानं शृणु मूर्ख त्वं श्रुत्या युक्त्या च पूरुषम् ।

देहातीतं सदाकारं सुदुर्दर्शं भवादृशैः ॥ ३० ॥

svātmānaṁ śṛṇu mūrkha tvaṁ śrutyā yuktyā ca pūruṣam |
dehātītaṁ sadākāraṁ sudurdarśaṁ bhavādṛśaiḥ || 30 ||

अहंशब्देन विख्यात एक एव स्थितः परः ।

स्थूलस्त्वनेकतां प्राप्तः कथं स्याद्देहकः पुमान् ॥ ३१ ॥

ahaṁśabdena vikhyāta eka eva sthitaḥ paraḥ |
sthūlastvanekatāṁ prāptaḥ kathaṁ syāddehakaḥ pumān || 31 ||

अहं द्रष्टृतया सिद्धो देहो दृश्यतया स्थितः ।

ममायमिति निर्देशात्कथं स्याद्देहकः पुमान् ॥ ३२ ॥

ahaṁ draṣṭṛtayā siddho deho dṛśyatayā sthitaḥ |
mamāyamiti nirdeśātkathaṁ syāddehakaḥ pumān || 32 ||

अहं विकारहीनस्तु देहो नित्यं विकारवान् ।

इति प्रतीयते साक्षात्कथं स्याद्देहकः पुमान् ॥ ३३ ॥

ahaṁ vikārahīnastu deho nityaṁ vikāravān |
iti pratīyate sākṣātkathaṁ syāddehakaḥ pumān || 33 ||

यस्मात्परमिति श्रुत्या तया पुरुषलक्षणम् ।

विनिर्णीतं विमूढेन कथं स्याद्देहकः पुमान् ॥ ३४ ॥

yasmātparamiti śrutyā tayā puruṣalakṣaṇam |
vinirṇītaṁ vimūḍhena kathaṁ syāddehakaḥ pumān || 34 ||

सर्वं पुरुष एवेति सूक्ते पुरुषसंज्ञिते ।

अप्युच्यते यतः श्रुत्या कथं स्याद्देहकः पुमान् ॥ ३५ ॥

sarvaṁ puruṣa eveti sūkte puruṣasañjñite |
apyucyate yataḥ śrutyā kathaṁ syāddehakaḥ pumān || 35 ||

असङ्गः पुरुषः प्रोक्तो बृहदारण्यकेऽपि च ।

अनन्तमलसंश्लिष्टः कथं स्याद्देहकः पुमान् ॥ ३६ ॥

asaṅgaḥ puruṣaḥ prokto bṛhadāraṇyake'pi ca |
anantamalasaṁśliṣṭaḥ kathaṁ syāddehakaḥ pumān || 36 ||

तत्रैव च समाख्यातः स्वयंज्योतिर्हि पूरुषः ।

जडः परप्रकाश्योऽसौ कथं स्याद्देहकः पुमान् ॥ ३७ ॥

tatraiva ca samākhyātaḥ svayañjyotirhi pūruṣaḥ |
jaḍaḥ paraprakāśyo'sau kathaṁ syāddehakaḥ pumān || 37 ||

प्रोक्तोऽपि कर्मकाण्डेन ह्यात्मा देहाद्विलक्षणः ।

नित्यश्च तत्फलं भुङ्क्ते देहपातादनन्तरम् ॥ ३८ ॥

prokto'pi karmakāṇḍena hyātmā dehādvilakṣaṇaḥ |
nityaśca tatphalaṁ bhuṅkte dehapātādanantaram || 38 ||

लिङ्गं चानेकसंयुक्तं चलं दृश्यं विकारि च ।

अव्यापकमसद्रूपं तत्कथं स्यात् पुमानयम् ॥ ३९ ॥

liṅgaṁ cānekasaṁyuktaṁ calaṁ dṛśyaṁ vikāri ca |
avyāpakamasadrūpaṁ tatkathaṁ syāt pumānayam || 39 ||

एवं देहद्वयादन्य आत्मा पुरुष ईश्वरः ।

सर्वात्मा सर्वरूपश्च सर्वातीतोऽहमव्ययः ॥ ४० ॥

evaṁ dehadvayādanya ātmā puruṣa īśvaraḥ |
sarvātmā sarvarūpaśca sarvātīto'hamavyayaḥ || 40 ||

इत्यात्मदेहभागेन प्रपञ्चस्यैव सत्यता ।

यथोक्ता तर्कशास्त्रेण ततः किंपुरुषार्थता ॥ ४१ ॥

ityātmadehabhāgena prapañcasyaiva satyatā |
yathoktā tarkaśāstreṇa tataḥ kimpuruṣārthatā || 41 ||

इत्यात्मदेहभेदेन देहात्मत्वं निवारितम् ।

इदानीं देहभेदस्य ह्यसत्त्वं स्फुटमुच्यते ॥ ४२ ॥

ityātmadehabhedena dehātmatvaṁ nivāritam |
idānīṁ dehabhedasya hyasattvaṁ sphuṭamucyate || 42 ||

चैतन्यस्यैकरूपत्वाद् भेदो युक्तो न कर्हिचित् ।

जीवत्वं च मृषा ज्ञेयं रज्जौ सर्पग्रहो यथा ॥ ४३ ॥

caitanyasyaikarūpatvād bhedo yukto na karhicit |
jīvatvaṁ ca mṛṣā jñeyaṁ rajjau sarpagraho yathā || 43 ||

रज्ज्वज्ञानात् क्षणेनैव यद्वद्रज्जुर्हि सर्पिणी ।

भाति तद्वच्चितिः साक्षाद्विश्वाकारेण केवला ॥ ४४ ॥

rajjvajñānāt kṣaṇenaiva yadvadrajjurhi sarpiṇī |
bhāti tadvaccitiḥ sākṣādviśvākāreṇa kevalā || 44 ||

उपादानं प्रपञ्चस्य ब्रह्मणोऽन्यन्न विद्यते ।

तस्मात्सर्वप्रपञ्चोऽयं ब्रह्मैवास्ति न चेतरत् ॥ ४५ ॥

upādānaṁ prapañcasya brahmaṇo'nyanna vidyate |
tasmātsarvaprapañco'yaṁ brahmaivāsti na cetarat || 45 ||

व्याप्यव्यापकता मिथ्या सर्वमात्मेति शासनात् ।

इति ज्ञाते परे तत्त्वे भेदस्यावसरः कुतः ॥ ४६ ॥

vyāpyavyāpakatā mithyā sarvamātmeti śāsanāt |
iti jñāte pare tattve bhedasyāvasaraḥ kutaḥ || 46 ||

श्रुत्या निवारितं नूनं नानात्वं स्वमुखेन हि ।

कथं भासो भवेदन्यः स्थिते चाद्वयकारणे ॥ ४७ ॥

śrutyā nivāritaṁ nūnaṁ nānātvaṁ svamukhena hi|
kathaṁ bhāso bhavedanyaḥ sthite cādvayakāraṇe || 47 ||

दोषोऽपि विहितः श्रुत्या मृत्योर्मृत्युं स गच्छति ।

इह पश्यति नानात्वं मायया वञ्चितो नरः ॥ ४८ ॥

doṣo'pi vihitaḥ śrutyā mṛtyormṛtyuaṁ sa gacchati |
iha paśyati nānātvaṁ māyayā vañcito naraḥ || 48 ||

ब्रह्मणः सर्वभूतानि जायन्ते परमात्मनः ।

तस्मादेतानि ब्रह्मैव भवन्तीत्यवधारयेत् ॥ ४९ ॥

brahmaṇaḥ sarvabhūtāni jāyante paramātmanaḥ |
tasmādetāni brahmaiva bhavantītyavadhārayet || 49 ||

ब्रह्मैव सर्वनामानि रूपाणि विविधानि च ।

कर्माण्यपि समग्राणि बिभर्तीति श्रुतिर्जगौ ॥ ५० ॥

brahmaiva sarvanāmāni rūpāṇi vividhāni ca |
karmāṇyapi samagrāṇi bibhartīti śrutirjagau || 50 ||

सुवर्णाज्जायमानस्य सुवर्णत्वं च शाश्वतम् ।

ब्रह्मणो जायमानस्य ब्रह्मत्वं च तथा भवेत् ॥ ५१ ॥

suvarṇājjāyamānasya suvarṇatvaṁ ca śāśvatam |
brahmaṇo jāyamānasya brahmatvaṁ ca tathā bhavet || 51 ||

स्वल्पमप्यन्तरं कृत्वा जीवात्मपरमात्मनोः ।

यः सन्तिष्ठति मूढात्मा भयं तस्याभिभाषितम् ॥ ५२ ॥

svalpamapyantaraṁ kṛtvā jīvātmaparamātmanoḥ |
yaḥ santiṣṭhati mūḍhātmā bhayaṁ tasyābhibhāṣitam || 52 ||

यत्राज्ञानाद्भवेद् द्वैतमितरस्तत्र पश्यति ।

आत्मत्वेन यदा सर्वं नेतरस्तत्र चाण्वपि ॥ ५३ ॥

yatrājñānādbhaved dvaitamitarastatra paśyati |
ātmatvena yadā sarvaṁ netarastatra cāṇvapi || 53 ||

यस्मिन् सर्वाणि भूतानि ह्यात्मत्वेन विजानतः ।

न वै तस्य भवेन्मोहो न च शोकोऽद्वितीयतः ॥ ५४ ॥

yasmin sarvāṇi bhūtāni hyātmatvena vijānataḥ |
na vai tasya bhavenmoho na ca śoko'dvitīyataḥ || 54 ||

अयमात्मा हि ब्रह्मैव सर्वात्मकतया स्थितः ।

इति निर्धारितं श्रुत्या बृहदारण्यसंस्थया ॥ ५५ ॥

ayamātmā hi brahmaiva sarvātmakatayā sthitaḥ ।
iti nirdhāritaṁ śrutyā bṛhadāraṇyasaṁsthayā ।। 55 ।।

अनुभूतोऽप्ययं लोको व्यवहारक्षमोऽपि सन् ।

असद्रूपो यथा स्वप्न उत्तरक्षणबाधतः ॥ ५६ ॥

anubhūto'pyayaṁ loko vyavahārakṣamo'pi san ।
asadrūpo yathā svapna uttarakṣaṇabādhataḥ ।। 56 ।।

स्वप्नो जागरणेऽलीकः स्वप्नेऽपि न हि जागरः ।

द्वयमेव लये नास्ति लयोऽपि ह्युभयोर्न च ॥ ५७ ॥

svapno jāgaraṇe'līkaḥ svapne'pi na hi jāgaraḥ ।
dvayameva laye nāsti layo'pi hyubhayorna ca ।। 57 ।।

त्रयमेव भवेन्मिथ्या गुणत्रयविनिर्मितम् ।

अस्य द्रष्टा गुणातीतो नित्यो ह्येकश्चिदात्मकः ॥ ५८ ॥

trayameva bhavenmithyā guṇatrayavinirmitam।
asya draṣṭā guṇātīto nityo hyekaścidātmakaḥ ।। 58 ।।

यद्वन्मृदि घटभ्रांतिं शुक्तौ वा रजतस्थितिम् ।

तद्वद्ब्रह्मणि जीवत्वं वीक्ष्यमाणे न पश्यति ॥ ५९ ॥

yadvanmṛdi ghaṭabhrātiṁ śuktau vā rajatasthitim ।
tadvadbrahmaṇi jīvatvaṁ vīkṣyamāṇe na paśyati ।। 59 ।।

यथा मृदि घटो नाम कनके कुण्डलाभिधा ।

शुक्तौ हि रजतख्यातिर्जीवशब्दस्तथा परे ॥ ६० ॥

yathā mṛdi ghaṭo nāma kanake kuṇḍalābhidhā |
śuktau hi rajatakhyātirjīvaśabdastathā pare || 60 ||

यथैव व्योम्नि नीलत्वं यथा नीरं मरुस्थले ।

पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदात्मनि ॥ ६१ ॥

yathaiva vyomni nīlatvaṁ yathā nīraṁ marusthale |
puruṣatvaṁ yathā sthāṇau tadvadviśvaṁ cidātmani || 61 ||

यथैव शून्ये वेतालो गन्धर्वाणां पुरं यथा ।

यथाऽऽकाशे द्विचन्द्रत्वं तद्वत्सत्ये जगत्स्थितिः ॥ ६२ ॥

yathaiva śūnye vetālo gandharvāṇāṁ puraṁ yathā |
yathā''kāśe dvicandratvaṁ tadvatsatye jagatsthitiḥ || 62 ||

यथा तरङ्गकल्लोलैर्जलमेव स्फुरत्यलम् ।

पात्रेरूपेण ताम्रं हि ब्रह्माण्डौघैस्तथाऽऽत्मता ॥ ६३ ॥

yathā taraṅgakallolairjalameva sphuratyalam |
pātrerūpeṇa tāmraṁ hi brahmāṇḍaughaistathā''tmatā || 63 ||

घटनाम्ना यथा पृथ्वी पटनाम्ना हि तन्तवः ।

जगन्नाम्ना चिदाभाति ज्ञेयं तत्तदभावतः ॥ ६४ ॥

ghaṭanāmnā yathā pṛthvī paṭanāmnā hi tantavaḥ |
jagannāmnā cidābhāti jñeyaṁ tattadabhāvataḥ || 64 ||

सर्वेऽपि व्यवारस्तु ब्रह्मणा क्रियते जनैः ।

अज्ञानान्न विजानन्ति मृदेव हि घटादिकम् ॥ ६५ ॥

sarve'pi vyavārastu brahmaṇā kriyate janaiḥ |
ajñānānna vijānanti mṛdeva hi ghaṭādikam || 65 ||

कार्यकारणता नित्यमास्ते घटमृदोर्यथा ।

तथैव श्रुतियुक्तिभ्यां प्रपञ्चब्रह्मणोरिह ॥ ६६ ॥

kāryakāraṇatā nityamāste ghaṭamṛdoryathā |
tathaiva śrutiyuktibhyāṁ prapañcabrahmaṇoriha || 66 ||

गृह्यमाणे घटे यद्वन्मृत्तिका भाति वै बलात् ।

वीक्ष्यमाणे प्रपञ्चेऽपि ब्रह्मैवाभाति भासुरम् ॥ ६७ ॥

gṛhyamāṇe ghaṭe yadvanmṛttikā bhāti vai balāt |
vīkṣyamāṇe prapañce'pi brahmaivābhāti bhāsuram || 67 ||

सदैवात्मा विशुद्धोऽस्ति ह्यशुद्धो भाति वै सदा ।

यथैव द्विविधा रज्जुर्ज्ञानिनीऽज्ञानिनोऽनिशम् ॥ ६८ ॥

sadaivātmā viśuddho'sti hyaśuddho bhāti vai sadā |
yathaiva dvividhā rajjurjñāninī'jñānino'niśam || 68 ||

यथैव मृन्मयः कुम्भस्तद्वद्देहोऽपि चिन्मयः ।

आत्मानात्मविभागोऽयं मुधैव क्रियतेऽबुधैः ॥ ६९ ॥

yathaiva mṛnmayaḥ kumbhastadvaddeho'pi cinmayaḥ |
ātmānātmavibhāgo'yaṁ mudhaiva kriyate'budhaiḥ || 69 ||

सर्पत्वेन यथा रज्जू रजतत्वेन शुक्तिका ।

विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ॥ ७० ॥

sarpatvena yathā rajjū rajatatvena śuktikā |
vinirṇītā vimūḍhena dehatvena tathā''tmatā || 70 ||

घटत्वेन यथा पृथ्वी पटत्वेनेव तन्तवः ।

विनिर्णीता विमूढेन देहत्वेन तथाऽऽत्मता ॥ ७१ ॥

ghaṭatvena yathā pṛthvī paṭatveneva tantavaḥ |
vinirṇītā vimūḍhena dehatvena tathā''tmatā || 71 ||

कनकं कुण्डलत्वेन तरङ्गत्वेन वै जलम् ॥

विनिर्णीता विमूढेन देहत्वेन तथाऽत्मता ॥ ७२ ॥

kanakaṁ kuṇḍalatvena taraṅgatvena vai jalam ||
vinirṇītā vimūḍhena dehatvena tathā'atmatā || 72 ||

पुरुषत्वे यथा स्थाणुर्जलत्वेन मरीचिका ।

विनिर्णीता विमूढेन देहत्वेन तथाऽत्मता ॥ ७३ ॥

puruṣatve yathā sthāṇurjalatvena marīcikā |
vinirṇītā vimūḍhena dehatvena tathā'atmatā || 73 ||

गृहत्वेनेव काष्ठानि खड्जत्वेनेव लोहता ।

विनिर्णीता विमूढेन देहत्वेन तथाऽत्मता ॥ ७४ ॥

gṛhatveneva kāṣṭhāni khaḍjatveneva lohatā |
vinirṇītā vimūḍhena dehatvena tathā'atmatā || 74 ||

यथा वृक्षविपर्यासो जलाद्भवति कस्यचित् ।

तद्वदात्मनि देहत्वं  पश्यत्यज्ञानयोगतः ॥ ७५ ॥

yathā vṛkṣaviparyāso jalādbhavati kasyacit ।
tadvadātmani dehatvaṁ  paśyatyajñānayogataḥ  ।। 75 ।।

पोतेन गच्छतः पुंसः सर्वं भातीव चञ्चलम् ।

तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७६ ॥

potena gacchataḥ puṁsaḥ sarvaṁ bhātīva cañcalam ।
tadvadātmani dehatvaṁ paśyatyajñānayogataḥ ।। 76 ।।

पीतत्वं हि यथा शुभ्रे दोषाद्भवति कस्यचित् ।

तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७७ ॥

pītatvaṁ hi yathā śubhre doṣādbhavati kasyacit ।
tadvadātmani dehatvaṁ paśyatyajñānayogataḥ ।। 77 ।।

चक्षुर्भ्यां भ्रमशीलाभ्यां सर्वं भाति भ्रमात्मकम् ।

तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७८ ॥

cakṣurbhyāṁ bhramaśīlābhyāṁ sarvaṁ bhāti bhramātmakam ।
tadvadātmani dehatvaṁ paśyatyajñānayogataḥ ।। 78 ।।

अलातं भ्रमणेनैव वर्तुलं भाति सूर्यवत् ।

तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ७९ ॥

alātaṁ bhramaṇenaiva vartulaṁ bhāti sūryavat ।
tadvadātmani dehatvaṁ paśyatyajñānayogataḥ ।। 79 ।।

महत्त्वे सर्ववस्तूनामणुत्वं ह्यतिदूरतः ।

तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८० ॥

mahattve sarvavastūnāmaṇutvaṁ hyatidūrataḥ |
tadvadātmani dehatvaṁ paśyatyajñānayogataḥ || 80 ||

सूक्ष्मत्वे सर्वभावानां स्थूलत्वं चोपनेत्रतः ।

तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८१ ॥

sūkṣmatve sarvabhāvānāṁ sthūlatvaṁ copanetrataḥ |
tadvadātmani dehatvaṁ paśyatyajñānayogataḥ || 81 ||

काचभूमौ जलत्वं वा जलभुमौ हि काचता ।

तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८२ ॥

kācabhūmau jalatvaṁ vā jalabhumau hi kācatā |
tadvadātmani dehatvaṁ paśyatyajñānayogataḥ || 82 ||

यद्वदग्नौ मणित्वं हि मणौ वा वह्निता पुमान् ।

तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८३ ॥

yadvadagnau maṇitvaṁ hi maṇau vā vahnitā pumān|
tadvadātmani dehatvaṁ paśyatyajñānayogataḥ || 83 ||

अभ्रेषु सत्सु धावत्सु सोमो धावति भाति वै ।

तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८४ ॥

abhreṣu satsu dhāvatsu somo dhāvati bhāti vai |
tadvadātmani dehatvaṁ paśyatyajñānayogataḥ || 84 ||

यथैव दिग्विपर्यासो मोहाद्भवति कस्यचित् ।

तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८५ ॥

yathaiva digviparyāso mohādbhavati kasyacit |
tadvadātmani dehatvaṁ paśyatyajñānayogataḥ || 85 ||

यथा शशी जले भाति चञ्चलत्वेन कस्यचित् ।

तद्वदात्मनि देहत्वं पश्यत्यज्ञानयोगतः ॥ ८६ ॥

yathā śaśī jale bhāti cañcalatvena kasyacit |
tadvadātmani dehatvaṁ paśyatyajñānayogataḥ || 86 ||

एवमात्मन्यविद्यातो देहाध्यासो हि जायते ।

स एवात्मपरिज्ञानाल्लीयते च परात्मनि ॥ ८७ ॥

evamātmanyavidyāto dehādhyāso hi jāyate |
sa evātmaparijñānāllīyate ca parātmani || 87 ||

सर्वमात्मतया ज्ञातं जगत्स्थावरजङ्गमम् ।

अभावात्सर्वभावानां देहस्य चात्मता कुतः ॥ ८८ ॥

sarvamātmatayā jñātaṁ jagatsthāvarajaṅgamam |
abhāvātsarvabhāvānāṁ dehasya cātmatā kutaḥ || 88 ||

आत्मानं सततं जानन्कालं नय महाद्युते ।

प्रारब्धमखिलं भुञ्जन्नोद्वेगं कर्तुमर्हसि ॥ ८९ ॥

ātmānaṁ satataṁ jānankālaṁ naya mahādyute |
prārabdhamakhilaṁ bhuñjannodvegaṁ kartumarhasi || 89 ||

उत्पन्नेऽप्यात्मविज्ञाने प्रारब्धं नैव मुञ्चति ।

इति यच्छ्रूयते शास्त्रे तन्निराक्रियतेऽधुना ॥ ९० ॥

utpanne'pyātmavijñāne prārabdhaṁ naiva muñcati |
iti yacchrūyate śāstre tannirākriyate'dhunā || 90 ||

तत्त्वज्ञानोदयादूर्ध्वं प्रारब्धं नैव विद्यते ।

देहादीनामसत्यत्वाद्यथा स्वप्नो विबोधतः ॥ ९१ ॥

tattvajñānodayādūrdhvaṁ prārabdhaṁ naiva vidyate |
dehādīnāmasatyatvādyathā svapno vibodhataḥ || 91 ||

कर्म जन्मान्तरीयं यत्प्रारब्धमिति कीर्तितम् ।

तत्तु जन्मान्तराभावात्पुंसो नैवास्ति कर्हिचित् ॥ ९२ ॥

karma janmāntarīyaṁ yatprārabdhamiti kīrtitam |
tattu janmāntarābhāvātpuṁso naivāsti karhicit || 92 ||

स्वप्नदेहो यथाऽध्यस्तस्तथैवायं हि देहकः ।

अध्यस्तस्य कुतो जन्म जन्माभावे हि तत्कुतः ॥ ९३ ॥

svapnadeho yathā'dhyastastathaivāyaṁ hi dehakaḥ |
adhyastasya kuto janma janmābhāve hi tatkutaḥ || 93 ||

उपादानं प्रपञ्चस्य मृद्भाण्डस्येव कथ्यते ।

अज्ञानं चैव वेदान्तैस्तस्मिन्नष्टे क्व विश्वता ॥ ९४ ॥

upādānaṁ prapañcasya mṛdbhāṇḍasyeva kathyate |
ajñānaṁ caiva vedāntaistasminnaṣṭe kva viśvatā || 94 ||

यथा रज्जुं परित्यज्य सर्पं गृह्णाति वै भ्रमात् ।

तद्वत्सत्यमविज्ञाय जगत्पस्यति मूढधीः ॥ ९५ ॥

yathā rajjuṁ parityajya sarpaṁ gṛhṇāti vai bhramāt |
tadvatsatyamavijñāya jagatpasyati mūḍhadhīḥ || 95 ||

रज्जुरूपे परिज्ञाते सर्पभ्रान्तिर्न तिष्ठति ।

अधिष्ठाने तथा ज्ञाते प्रपञ्चः शून्यतां व्रजेत् ॥ ९६ ॥

rajjurūpe parijñāte sarpabhrāntirna tiṣṭhati |
adhiṣṭhāne tathā jñāate prapañcaḥ śūnyatāṁ vrajet || 96 ||

देहस्यापि प्रपञ्चत्वात्प्रारब्धावस्थितिः कुतः ।

अज्ञानिजनबोधार्थं प्रारब्धं वक्ति वै श्रुतिः ॥ ९७ ॥

dehasyāpi prapañcatvātprārabdhāvasthitiḥ kutaḥ |
ajñānijanabodhārthaṁ prārabdhaṁ vakti vai śrutiḥ || 97 ||

क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ।

बहुत्वं तन्निषेधार्थं श्रुत्या गीतं च यत्स्फुटम् ॥ ९८ ॥

kṣīyante cāsya karmāṇi tasmindṛṣṭe parāvare |
bahutvaṁ tanniṣedhārthaṁ śrutyā gītaṁ ca yatsphuṭam || 98 ||

उच्यतेऽज्ञैर्बलाच्चैतत्तदाऽनर्थद्वयागमः ।

वेदान्तमतहानं च यतो ज्ञानमिति श्रुतिः ॥ ९९ ॥

ucyate'jñairbalāccaitattadā'narthadvayāgamaḥ |
vedāntamatahānaṁ ca yato jñānamiti śrutiḥ || 99 ||

त्रिपञ्चाङ्गान्यथो  वक्ष्ये पूर्वोक्तस्य हि लब्धये ।
तैश्च सर्वैः सदा कार्यं निदिध्यासनमेव तु ॥ १०० ॥

tripañcāṅgānyatho  vakṣye pūrvoktasya hi labdhaye |
taiśca sarvaiḥ sadā kāryaṁ nididhyāsanameva tu || 100 ||

नित्याभ्यासादृते प्राप्तिर्न भवेत्सच्चिदात्मनः ।
तस्माद्ब्रह्म निदिध्यासेज्जिज्ञासुः श्रेयसे चिरम् ॥ १०१ ॥

nityābhyāsādṛte prāptirna bhavetsaccidātmanaḥ |
tasmādbrahma nididhyāsejjijñāsuḥ śreyase ciram || 101 ||

यमो हि नियमस्त्यागो मौनं देशश्च कालता ।
आसनं मूलबन्धश्च देहसाम्यं च दृक्स्थितिः ॥ १०२ ॥

yamo hi niyamastyāgo maunaṁ deśaśca kālatā |
āsanaṁ mūlabandhaśca dehasāmyaṁ ca dṛk sthitiḥ || 102 ||

प्राणसंयमनं चैव प्रत्याहारश्च धारणा ।
आत्मध्यानं समाधिश्च प्रोक्तान्यङ्गानि वै क्रमात् ॥ १०३ ॥

prāṇasaṁyamanaṁ caiva pratyāhāraśca dhāraṇā |
ātmadhyānaṁ samādhiśca proktānyaṅgāni vai kramāt || 103 ||

सर्वं ब्रह्मेति विज्ञानादिन्द्रियग्रामसंयमः ।
यमोऽयमिति सम्प्रोक्तोऽभ्यसनीयो मुहुर्मुहुः ॥ १०४ ॥

sarvaṁ brahmeti vijñānādindriyagrāmasaṁyamaḥ |
yamo'yamiti samprokto'bhyasanīyo muhurmuhuḥ || 104 ||

सजातीयप्रवाहश्च विजातीयतिरस्कृतिः ।

नियमो हि परानन्दो नियमात्क्रियते बुधैः ॥ १०५ ॥

sajātīyapravāhaśca vijātīyatiraskṛtiḥ ।
niyamo hi parānando niyamātkriyate budhaiḥ ।। 105 ।।

त्यागः प्रपञ्चरूपस्य चिदात्मत्त्वावलोकनात् ।

त्यागो हि महतां पूज्यः सद्यो मोक्षमयो यतः ॥ १०६ ॥

tyāgaḥ prapañcarūpasya cidātmattvāvalokanāt ।
tyāgo hi mahatāṁ pūjyaḥ sadyo mokṣamayo yataḥ ।। 106 ।।

यस्माद्वाचो निवर्तन्ते अप्राप्य मनसा सह ।

यन्मौनं योगिभिर्गम्यं तद्भवेत्सर्वदा बुधः ॥ १०७ ॥

yasmādvāaco nivartante aprāpya manasā saha।
yanmaunaṁ yogibhirgamyaṁ tadbhavetsarvadā budhaḥ ।। 107 ।।

वाचो यस्मान्निवर्तन्ते तद्वक्तुं केन शक्यते ।

प्रपञ्चो यदि वक्तव्यः सोऽपि शब्दविवर्जितः ॥ १०८ ॥

vāco yasmānnivartante tadvaktuṁ kena śakyate ।
prapañco yadi vaktavyaḥ so'pi śabdavivarjitaḥ ।। 108 ।।

इति वा तद्भवेन्मौनं सतां सहजसंज्ञितम् ।

गिरा मौनं तु बालानां प्रयुक्तं ब्रह्मवादिभिः ॥१०९ ॥

iti vā tadbhavenmaunaṁ satāṁ sahajasañjñitam ।
girā maunaṁ tu bālānāṁ prayuktaṁ brahmavādibhiḥ ।।109 ।।

आदावन्ते च मध्ये च जनो यस्मिन्न विद्यते ।

येनेदं सततं व्याप्तं स देशो विजनः स्मृतः ॥ ११० ॥

ādāvante ca madhye ca jano yasminna vidyate |
yenedaṁ satataṁ vyāptaṁ sa deśo vijanaḥ smṛtaḥ || 110 ||

कलनात्सर्वभूतानां ब्रह्मादीनां निमेषतः ।

कालशब्देन निर्दिष्टो ह्यखण्डानन्द अद्वयः ॥ १११ ॥

kalanātsarvabhūtānāṁ brahmādīnāṁ nimeṣataḥ |
kālaśabdena nirdiṣṭo hyakhaṇḍānanda advayaḥ || 111 ||

सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्मचिन्तनम् ।

आसनं तद्विजानीयान्नेतरत्सुखनाशनम् ॥ ११२ ॥

sukhenaiva bhavedyasminnajasraṁ brahmacintanam |
āsanaṁ tadvijānīyānnetaratsukhanāśanam || 112 ||

सिद्धं यत्सर्वभूतादि विश्वाधिष्ठानमव्ययम् ।

यस्मिन् सिद्धाः समाविष्टास्तद्वै सिद्धासनं विदुः ॥ ११३ ॥

siddhaṁ yatsarvabhūtādi viśvādhiṣṭhānamavyayam |
yasmin siddhāḥ samāviṣṭāstadvai siddhāsanaṁ viduḥ || 113 ||

यन्मूलं सर्वभूतानां यन्मूलं चित्तबन्धनम् ।

मूलबन्धः सदा सेव्यो योग्योऽसौ राजयोगिनाम् ॥ ११४ ॥

yanmūlaṁ sarvabhūtānāṁ yanmūlaṁ cittabandhanam |
mūlabandhaḥ sadā sevyo yogyo'sau rājayoginām || 114 ||

अङ्गानां समतां विद्यात् समे ब्रह्मणि लीयते ।

नो चेन्नैव समानत्वमृजुत्वं शुष्कवृक्षवत् ॥ ११५ ॥

aṅgānāṁ samatāṁ vidyāt same brahmaṇi līyate |
no cennaiva samānatvamṛjutvaṁ śuṣkavṛkṣavat || 115 ||

दृष्टिं ज्ञानमयीं कृत्वा पश्येद् ब्रह्ममयं जगत् ।

सा दृष्टिः परमोदारा न नासाग्रावलोकिनी ॥ ११६ ॥

dṛṣṭiṁ jñānamayīṁ kṛtvā paśyed brahmamayaṁ jagat |
sā dṛṣṭiḥ paramodārā na nāsāgrāvalokinī || 116 ||

दृष्टिदर्शनदृश्यानां विरामो यत्र वा भवेत् ।

दृष्टिस्तत्रैव कर्त्तव्या न नासाग्रावलोकिनी ॥ ११७ ॥

dṛṣṭidarśanadṛśyānāṁ virāmo yatra vā bhavet |
dṛṣṭistatraiva karttavyā na nāsāgrāvalokinī || 117 ||

चित्तादिसर्वभावेषु ब्रह्मत्वेनैव भावनात् ।

निरोधः सर्ववृत्तीनां प्राणायामः स उच्यते ॥ ११८ ॥

cittādisarvabhāveṣu brahmatvenaiva bhāvanāt |
nirodhaḥ sarvavṛttīnāṁ prāṇāyāmaḥ sa ucyate || 118 ||

निषेधनं प्रपञ्चस्य रेचकाख्यः समीरणः ।

ब्रह्मैवास्मीति या वृत्तिः पूरको वायुरीरितः ॥ ११९ ॥

niṣedhanaṁ prapañcasya recakākhyaḥ samīraṇaḥ |
brahmaivāsmīti yā vṛttiḥ pūrako vāyurīritaḥ || 119 ||

ततस्तद्वृत्तिनैश्चल्यं कुम्भकः प्राणसंयमः ।

अयं चापि प्रबुद्धानामज्ञानां घ्राणपीडनम् ॥ १२० ॥

tatastadvṛttinaiścalyaṁ kumbhakaḥ prāṇasaṁyamaḥ |
ayaṁ cāpi prabuddhānāmajñānāṁ ghrāṇapīḍanam || 120 ||

विषयेष्वात्मतां दृष्ट्वा मनसश्चिति मज्जनम् ।

प्रत्याहारः स विज्ञेयोऽभ्यसनीयो मुमुक्षुभिः ॥ १२१ ॥

viṣayeṣvātmatāṁ dṛṣṭvā manasaściti majjanam |
pratyāhāraḥ sa vijñeyo'bhyasanīyo mumukṣubhiḥ || 121 ||

यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात् ।

मनसो धारणं चैव धारणा सा परा मता ॥ १२२ ॥

yatra yatra mano yāti brahmaṇastatra darśanāt |
manaso dhāraṇaṁ caiva dhāraṇā sā parā matā || 122 ||

ब्रह्मैवास्मीति सद्वृत्त्या निरालम्बतया स्थितिः ।

ध्यानशब्देन विख्याता परमानन्ददायिनी ॥ १२३ ॥

brahmaivāsmīti sadvṛttyā nirālambatayā sthitiḥ |
dhyānaśabdena vikhyātā paramānandadāyinī || 123 ||

निर्विकारतया वृत्त्या ब्रह्माकारतया पुनः ।

वृत्तिविस्मरणं सम्यक् समाधिर्ज्ञानसंज्ञकः ॥ १२४ ॥

nirvikāratayā vṛttyā brahmākāratayā punaḥ |
vṛttivismaraṇaṁ samyak samādhirjñānasañjñakaḥ || 124 ||

इमं चाकृत्रिमानन्दं तावत्साधु समभ्यसेत्।

वश्यो यावत्क्षणात्पुंसः प्रयुक्तः सम्भवेत्स्वयम्॥ १२५॥

imaṁ cākṛtrimānandaṁ tāvatsādhu samabhyaset |
vaśyo yāvatkṣaṇātpuṁsaḥ prayuktaḥ sambhavetsvayam || 125 ||

ततः साधननिर्मुक्तः सिद्धो भवति योगिराट्।

तत्स्वरूपं न चैतस्य विषयो मनसो गिराम्। १२६॥

tataḥ sādhananirmuktaḥ siddho bhavati yogirāṭ |
tatsvarūpaṁ na caitasya viṣayo manaso girām | 126 ||

समाधौ क्रियमाणे तु विघ्ना आयान्ति वै बलात्।

अनुसन्धानराहित्यमालस्यं भोजलालसम्॥ १२७॥

samādhau kriyamāṇe tu vighnā āyānti vai balāt |
anusandhānarāhityamālasyaṁ bhojalālasam || 127 ||

लयस्तमश्च विक्षेपो रसास्वादश्च शून्यता।

एवं यद्विघ्नबाहुल्यं त्याज्यं ब्रह्मविदा शनैः॥ १२८॥

layastamaśca vikṣepo rasāsvādaśca śūnyatā |
evaṁ yadvighnabāhulyaṁ tyājyaṁ brahmavidā śanaiḥ || 128 ||

भाववृत्त्या हि भावत्वं शून्यवृत्त्या हे शून्यता।

ब्रह्मवृत्त्या हि पूर्णत्वं तया पूर्णत्वमभ्यसेत्॥ १२९॥

bhāvavṛttyā hi bhāvatvaṁ śūnyavṛttyā he śūnyatā |
brahmavṛttyā hi pūrṇatvaṁ tayā pūrṇatvamabhyaset || 129 ||

ये हि वृत्तिं जहत्येनां ब्रह्माख्यां पावनीं पराम् ।

ते तु वृथैव जीवन्ति पशुभिश्च समा नराः ॥ १३० ॥

ye hi vṛttiṁ jahatyenāṁ brahmākhyāṁ pāvanīṁ parām |
te tu vṛthaiva jīvanti paśubhiśca samā narāḥ || 130 ||

ये हि वृत्तिं विजानन्ति ज्ञात्वापि वर्धयन्ति ये ।

ते वै सत्पुरुषा धन्या वन्द्यास्ते भुवनत्रये ॥ १३१ ॥

ye hi vṛttiṁ vijānanti jñātvāpi vardhayanti ye |
te vai satpuruṣā dhanyā vandyāste bhuvanatraye || 131 ||

येषां वृत्तिः समा वृद्धा परिपक्वा च सा पुनः ।

ते वै सद्ब्रह्मतां प्राप्ता नेतरे शब्दवादिनः ॥ १३२ ॥

yeṣāṁ vṛttiḥ samā vṛddhā paripakvā ca sā punaḥ |
te vai sadbrahmatāṁ prāptā netare śabdavādinaḥ || 132 ||

कुशला ब्रह्मवार्तायां वृत्तिहीनाः सुरागिणः ।

तेऽप्यज्ञानितया नूनं पुनरायान्ति यान्ति च ॥ १३३ ॥

kuśalā brahmavārtāyāṁ vṛttihīnāḥ surāgiṇaḥ |
te'pyajñānitayā nūnaṁ punarāyānti yānti ca || 133 ||

निमेषार्धं न तिष्ठन्ति वृत्तिं ब्रह्ममयीं विना ।

यथा तिष्ठन्ति ब्रह्माद्याः सनकाद्याः शुकादयः ॥ १३४ ॥

nimeṣārdhaṁ na tiṣṭhanti vṛttiṁ brahmamayīṁ vinā |
yathā tiṣṭhanti brahmādyāḥ sanakādyāḥ śukādayaḥ || 134 ||

कार्ये कारणताऽऽयाता कारणे नहि कार्यता ।

कारणत्वं ततो गच्छेत्कार्याभावे विचारतः ॥ १३५ ॥

kārye kāraṇtā''yātā kāraṇe nahi kāryatā ।
kāraṇatvaṁ tato gacchetkāryābhāve vicārataḥ ।। 135 ।।

अथ शुद्धं भवेद्वस्तु यद्वै वाचामगोचरम् ।

द्रष्टव्यं मृद्घटेनैव दृष्टान्तेन पुनः पुनः ॥ १३६ ॥

atha śuddhaṁ bhavedvastu yadvai vācāmagocaram ।
draṣṭavyaṁ mṛdghaṭenaiva dṛṣṭāntena punaḥ punaḥ ।। 136 ।।

अनेनैव प्रकारेण वृत्तिर्ब्रह्मात्मिका भवेत् ।

उदेति शुद्धचित्तानां वृत्तिज्ञानं ततः परम् ॥ १३७ ॥

anenaiva prakāreṇa vṛttirbrahmātmikā bhavet ।
udeti śuddhacittānāṁ vṛttijñānaṁ tataḥ param ।। 137 ।।

कारणं व्यतिरेकेण पुमानादौ विलोकयेत् ।

अन्वयेन पुनस्तद्धि कार्ये नित्ये प्रपश्यति   १३८ ॥

kāraṇaṁ vyatirekeṇa pumānādau vilokayet ।
anvayena punastaddhi kārye nitye prapaśyati   138 ।।

कार्ये हि कारणं पश्येत्पश्चात्कार्यं विसर्जयेत् ।

कारणत्वं ततो गच्छेदवशिष्टं भवेन्मुनिः ॥ १३९ ॥

kārye hi kāraṇaṁ paśyetpaścātkāryaṁ visarjayet ।
kāraṇatvaṁ tato gacchedavaśiṣṭaṁ bhavenmuniḥ ।। 139 ।।

भावितं तीव्रवेगेन यद्वस्तु निश्चयात्मना ।

पुमांस्तद्धि भवेच्छीघ्रं ज्ञेयं भ्रमरकीटवत् ॥ १४० ॥

bhāvitaṁ tīvravegena yadvastu niścayātmanā |
pumāṁstaddhi bhavecchīġraṁ jñeyaṁ bhramarakīṭavat || 140 ||

अदृश्यं भावरूपं च सर्वमेव चिदात्मकम् ।

सावधानतया नित्यं स्वात्मानं भावयेद्बुधः ॥ १४१ ॥

adṛśyaṁ bhāvarūpaṁ ca sarvameva cidātmakam |
sāvadhānatayā nityaṁ svātmānaṁ bhāvayedbudhaḥ || 141 ||

दृश्यं ह्यदृश्यतां नीत्या ब्रह्माकारेण चिन्तयेत् ।

विद्वान्नित्यसुस्के तिष्ठेद्धिया चिद्रसपूर्णया ॥ १४२ ॥

dṛśyaṁ hyadṛśyatāṁ nītyā brahmākāreṇa cintayet |
vidvānnityasuske tiṣṭheddhiyā cidrasapūrṇayā || 142 ||

एभिरङ्गैः समायुक्तो राजयोग उदाहृतः ।

किञ्चित्पक्वकषायाणां हठयोगेन संयुतः ॥ १४३ ॥

ebhiraṅgaiḥ samāyukto rājayoga udāhṛtaḥ |
kiñcitpakvakaṣāyāṇāṁ haṭhayogena saṁyutaḥ || 143 ||

परिपक्वं मनो येषां केवलोऽयं च सिद्धिदः ।

गुरुदैवतभक्तानां सर्वेषां सुलभो जवात् ॥ १४४ ॥

paripakvaṁ mano yeṣāṁ kevalo'yaṁ ca siddhidaḥ |
gurudaivatabhaktānāṁ sarveṣāṁ sulabho javāt || 144 ||

॥ इति श्रीमच्छङ्करभगवत्पादाचार्यविरचिताऽपरोक्षानुभूतिः समाप्ता ॥

|| iti śrīmacchaṅkarabhagavatpādācāryaviracitā'parokṣānubhūtiḥ samāptā ||